निरवयवद्रव्यत्वादिति सिद्धम् । सांख्यादयस्तु शब्दतन्मात्रतस्तदुत्पत्तिं स्वीचक्रुः "प्रकृतेर्महान् महतोऽहङ्कारोऽहङ्कारात् पञ्चतन्मात्राणि" इत्युपक्रम्य "पञ्चभ्यः पञ्चभूतानि" इत्युक्तेः । वेदान्तिनस्तु अविद्यासहकृतब्रह्मण एव सकाशात्तदुत्पत्तिमङ्गीचक्रुः तस्य चोत्पत्तिमत्त्वे "तस्माद्वा एतस्मादात्मनः आकाशः सम्भूतः" इति श्रुतिर्मानम् । यतो वा इमानि भूतानि जायन्ते इत्यादिश्रुत्या ब्रह्मणः सर्व्वभूतकारणत्वान्यथानुपपत्त्याऽपि तस्योत्पत्तिमत्त्वम् । श्रुतेर्गौणोत्पत्तिपरत्वं च आशङ्कापूर्व्वकं शा०सूत्रभाष्ययोर्निराकृतं यथा । "नवियदश्रुतेः सू० "वेदान्तेषु तत्र तत्र भिन्नप्रस्थाना उत्पत्तिश्रुतय उपलभ्यन्ते । केचिदाकाशस्योत्पत्तिमामनन्ति केचिन्न । तथा केचिद्वायोरुत्पत्तिमामनन्ति केचिन्न । एवं जीवस्य प्राणानाञ्च । एवमेव क्रमादिद्वारकोऽपि विप्रतिषेधः श्रुत्यन्तरेषु लक्ष्यते । विप्रतिषेधाच्च परपक्षाणामनपेक्षत्वं स्थापितं तद्वत् स्वपक्षस्यापि विप्रतिषेधादेवानापेक्षत्वमाशङ्क्येतेत्यतः सर्ववेदान्तगतसृष्टिश्रुत्यर्थनिर्मलत्वाय परः प्रपञ्च आरभ्यते । तदर्थनिर्मलत्वे च फलं यथोक्ताशङ्कानिवृत्तिरेव । तत्र प्रथमं तावदाकाशमाश्रित्य विचिन्त्यते किमस्योत्पत्तिरस्त्युत नास्तीति । तत्र तावत् प्रतिपद्यते । न वियदश्रुतेरिति न खल्वाकाशमुत्पद्यते कस्मात् अश्रुतेः नह्यस्योत्पत्तिप्रकरणे श्रवणमस्ति । छान्दोग्ये हि "सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमिति" सच्छब्दवाच्यं ब्रह्म प्रकृत्य "तदैक्षत तत्तेजोऽसृजतेति च पञ्चानां महाभूतानां मध्यमं तेजआदिं कृत्वा त्रयाणां तेजोऽबन्नानामुत्पत्तिः श्राव्यते । श्रुतिश्च नः प्रमाणमतीन्द्रियार्थविज्ञानोत्पत्तौ । न चात्र श्रुतिरस्त्याकाशोत्पत्तिप्रतिपादिनी तस्मान्नास्त्याकाशस्योत्पत्तिरिति" भा० "अस्ति तु" सू० । तुशब्दः पक्षान्तरपरिग्रहे । मा नामाकाशस्य छान्दोग्ये भूदुत्पत्तिः श्रुत्यन्तरे त्वस्ति । तैत्तिरीयकाः समामनन्ति "सत्यं ज्ञानमनन्तं ब्रह्मेति" प्रकृत्य "तस्माद्वा एतस्मादात्मन आकाशः सम्भूत" इति । ततश्च श्रुत्योर्विप्रतिषेधः क्वचित्तेजःप्रमुखा सृष्टिः क्वचिदाकाशप्रमुखेति । नन्वेकवाक्यताऽनयोः श्रुत्योर्युक्ता । सत्यं युक्ता न तु सावगन्तुं शक्यते कुतः "तत्तेजोऽसृजतेति" सकृच्छ्रुतस्य स्रष्टुः स्रष्टव्यद्वयेन सम्बन्धानुपपत्तेः तत्तेजोऽसृजत तदाकाशमसृजतेति । ननु सकृच्छ्रुतस्य कर्त्तुः कर्त्तव्यद्वयेन सम्बन्धो दृश्यते यथा स सूपं पक्त्वौदनं पचतीति । एवं तदाकाशं सृष्ट्वा तेजोऽसृजतेति योजयिष्यामः । नैवं युज्यते प्रथमजत्वं हि छान्दोग्ये तेजसोऽवगम्यते तैत्तिरीयके त्वाकाशस्य । नचोभयोः प्रथमजत्वं सम्भवति । एतेनेतरश्रुत्यक्षरविरोधोऽपि व्याख्यातः । तस्माद्वा एतस्मादात्मन आकाशः सम्भूत इत्यत्रापि तस्मात् आकाशः सम्भूतस्तस्मात्तेजः सम्भूतमिति सकृच्छ्रुतस्यापादानस्य सम्भवनस्य च वियत्तेजोभ्यां युगपत्सम्बन्धानुपपत्तेः । वायोरग्निरिति च पृथगाम्नानात् । अस्मिन् विप्रतिषेधे कश्चिदाह । "गौण्यसम्भवात्" सू० । नास्ति वियत उत्पत्तिः अश्रुतेरेव । या त्वितरा वियदुत्पत्तिवादिनी श्रुतिरुदाहृता सा गौणी भवितुमर्हति । कस्मात् ? असम्भवात् । नह्याकाशस्योत्पत्तिः सम्भावयितुं शक्या श्रीमत्कणभुगभिप्रायानुसारिषु जीवत्सु । ते हि कारणसामग्र्यसम्भवादाकाशस्योत्पत्तिं वारयन्ति । समवाय्यसमवायिनिमित्तकारणेभ्यो हि किल सर्व्वमुत्पद्यमानमुत्पद्यते । द्रव्यस्य चैकजातीयमनेकञ्च द्रव्यं समवायि कारणम्भवति । नचाकाशस्यैकजातीयमनेकञ्च द्रव्यमारम्भकमस्ति यस्मिन् समवायिकारणेऽसमवायिकारणे च तत्संयोगे आकाशमुत्पद्येत । तदभावात्तदनुग्रहप्रवृत्तं निमित्तकारणं दूरापेतमेवाकाशस्य भवति । उत्पत्तिमताञ्च तेजःप्रभृतीनां पूर्व्वोत्तरकालयोर्विशेषः सम्भाव्यते प्रागुत्पत्तेः प्रकाशादिकार्य्यं न बभूव पश्चाच्च भवतीति । आकाशस्य पुनर्न पूर्व्वोत्तरकालयोर्विशेषः सम्भावयितुं शक्यते । किं हि प्रागुत्पत्तेरनवकाशमसुषिरमच्छिद्रं बभूवेति शक्यतेऽध्यवसातुम् । पृथिव्यादिवैधर्म्याच्च विभुत्वादिलक्षणादाकाशस्याजत्वसिद्धिः । तस्माद्यथा लोके आकाशं कुरु आकाशो जात इत्येवं जातीयको गौणः प्रयोगो भवति यथा च घटाकाशः करकाकाशो गृहाकाश इत्येकस्याप्याकाशस्यैवंजातीयको भेदव्यपदेशो भवति । वेदेऽपि आरण्यानाकाशेष्वालभेरन्निति । एवमुत्पत्तिश्रुतिरपि गौणी द्रष्टव्या भा० "शब्दाच्च" सू० । शब्दः खल्वप्याकाशस्याजत्वं ख्यापयति । अत आह "वायुश्चान्तरिक्षञ्चैतदमृतमिति" न चामृतस्योत्पत्तिरुपपद्यते । "आकाशवत् सर्व्वगतश्च नित्य इति" चाकाशेन ब्रह्मणो नित्यत्वसर्व्वगतत्वाभ्यां धर्म्माभ्यामुपमिमानः आकाशस्यापि तौ धर्म्मौ सूचयति । न च तादृशस्योत्पत्तिरुपपद्यते । यथाऽनन्तोयमाकाश एवमनन्त आत्मा वेदितव्य इति चोदाहरणम् । आकाशशरीरं ब्रह्म आकाशआत्मेति । नह्याकाशस्योत्पत्तिमत्त्वे ब्रह्मण-